# ॥ શ્રીરામકૃષ્ણપરમહંસોપદેશાવલિઃ ૨ ॥

.. Shri Ramakrishnopadeshavalih 2 ..

sanskritdocuments.org

August 22, 2017

# .. Shri Ramakrishnopadeshavalih 2 ..

# ॥ શ્રીરામકૃષ્ણપરમહંસોપદેશાવલિઃ ૨ ॥

## Sanskrit Document Information

Text title : Shri RamakrishnopadeshAvaliH 2

File name : rAmakRiShNopadesha2.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Sw. Ramakrishnananda (1863-1911)

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Description-comments : English and Hindi translations in the source book

Source : ShriRamKrishna UpadeshSahasri by Swami Apurvananda

Latest update : July 10, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 22, 2017

*sanskritdocuments.org*

યથા વિલિપ્તે તુ રસૈઃ પ્રકાશતે
કાચસ્ય પૃષ્ઠે પ્રતિરૂપસઞ્ચયઃ ।
હૃલ્લગ્નશુક્રે ચ તથોર્ધ્વરેતસા-
માદર્શવત્ સર્વવિભુઃ પ્રકાશતે ॥ ૧॥

વાષ્પાલોકા યથૈવેહ પુરવર્ત્મગૃહાદિકમ્ ।
નાનારુગ્ભિર્દ્યોતયન્તિ હ્યેકકોષાત્ સમાગતાઃ ॥

નાનાજાતિકુલોદ્ભૂતા અવતારાસ્તથા ભૃશમ્ ।
સર્વાન્ દેશાન્ ભાસયતિ હ્યદ્વયેશાત્ સમાગતાઃ ॥ ૨॥

યથા સ્પર્શમણિં સ્પૃષ્ટ્વા લોહઃ કાઞ્ચનતાં ગતઃ ।
સ્થાપિતો યત્ર કુત્રાપિ વિકૃતિં નૈવ ગચ્છતિ ॥

તથા સદ્ગુરુસંસર્ગાદ્ યદા નિર્મલતાં વ્રજેત્ ।
શુભાન્વિતો જનઃ કોઽપિ ન પુનઃ કિલ્બિષી ભવેત્ ॥ ૩॥

યથા સ્પર્શમણેઃ સ્પર્શાત્ તરવારો હ્યયોમયઃ ।
હિરણ્મયત્વમાસાદ્ય ન તુ રૂપં ત્યજેત્ સ્વકમ્ ॥

તથાપિ પૂર્વવત્ નાન્યદ્ધિંસિતું ક્ષમતે ત્વસૌ ।
તથા હરિપદસ્પર્શાત્ કશ્ચિત્ પુણ્યવતાં વરઃ ॥

નિર્મલત્વં સમાસાદ્ય પૂર્વદેહં સમાશ્રયેત્ ।
તથાપ્યસૌ પુનર્નેહ ગચ્છેદ્વૈ રિપુવશ્યતામ્ ॥ ૪॥

અયસ્કાન્તગિરિર્ગુપ્તઃ સમુદ્રસલિલાન્તરે ।
વિશ્લેષયત્યયઃ કીલાન્ પોતેભ્યઃ ક્ષણમાત્રતઃ ॥

તથા હરિકૃપાકર્ષાન્ નરો વિગતબન્ધનઃ ।
તત્પ્રેમાર્ણવગર્ભે વૈ હ્યાત્મારામો નિમજ્જતિ ॥ ૫॥

સિદ્ધકન્દમૂલાદીનિ ભજન્તે મૃદુતાં યથા ।
અસિદ્ધાનિ યથા તાનિ સન્ત્યેવ કઠિનાનિ ચ ॥

નિષ્ઠુરોઽપિ તથા સિદ્ધઃ પુરુષો જાયતે યદા ।
કોમલત્વમાપ્નોતિ કાઠિન્યં સંવિહાય સઃ ॥

અસિદ્ધઃ સ્વલ્પસિદ્ધો વા સ્વભાવાદ્ વિકૃતો ભવેત્ ।

મૃષાચારી મૃષાભાષી સુદુષ્ટો જાયતે ધ્રુવમ્ ॥ ૬॥

સ્વપ્નમન્ત્ર-હઠકૃપા-નિત્યત્વાદિ-વિભેદતઃ ।
સિદ્ધાઃ પઞ્ચવિધા જ્ઞેયાઃ પૃથ્વીશોભાવિવર્ધનાઃ ॥

સ્વપ્નકાલે યદા કોઽપિ મન્ત્રં પ્રાપ્ય તુ ચેતનમ્ ।
તેનૈવ સિદ્ધિમાપ્નોતિ સ્વપ્નસિદ્ધઃ સ ઉચ્યતે ॥

ગુરુદત્તં શુભં મન્ત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।
યો જપ્ત્વા સિદ્ધિમાપ્નોતિ મન્ત્રસિદ્ધઃ સ એવ હિ ॥

હઠાત્ પ્રાપ્ય ધનં દીનો ભવેત્તૂર્ણં ધની યથા ।
દુષ્ટોઽપિ સાધુતામેતિ સહસૈવ ક્વચિદ્ભુવિ ॥

દીર્ઘકાલતપસ્યાભિર્યત્ ફલં પ્રાપ્યતે નરૈઃ ।
મુહૂર્તેનૈવ તત્પ્રાપ્ય હઠસિદ્ધ સ જાયતે ॥

દીનં હીનં યથા દૃષ્ટ્વા ધની કૃપાપરાયણઃ ।
તસ્યાપનયતિ ક્લેશં ધનદાનેન સર્વથા ॥

વીક્ષ્ય કઞ્ચિદ્ દીનચિત્તં દુરાચાર નરં તથા ।
કરોતિ સાત્ત્વિકશ્રેષ્ઠ ગોવિન્દો દીનવત્સલઃ ॥

તસ્યૈવ નરદેવસ્ય સર્વપૂજ્યસ્ય વૈ તદા ।
કૃપાસિદ્ધ ઇતિ ખ્યાતિર્ભવતીહ ધરાતલે ॥

કુષ્માણ્ડાલાવુવલ્લીનાં યથા ફલોદયાત્ પરમ્ ।
પુષ્પાણિ સમ્ભવન્તીહ ફલાનિ ચ તતઃ પરમ્ ॥

તથા યે નિત્યસિદ્ધાસ્તે જન્મસિદ્ધા ભવન્તિ વૈ ।
તેષાં ત્વાજન્મસિદ્ધાનાં કર્તવ્યાનીહ સન્તિ ન ॥

તથાપિ તેઽનુતિષ્ઠન્તિ યાનિ કર્માણિ સિદ્ધયે ।
તાન્યેવ લોકશિક્ષાર્થં નિત્યસિદ્ધાસ્ત એવ હિ ॥ ૭॥

યથા દૂરતો હટ્ટકોલાહલોઽયમ્
અબોધ્યઃ સદા ભાતિ સર્વૈર્મનુષ્યૈઃ ।
સમીપે તુ વાણિજ્યકાર્યોત્થ-શબ્દાઃ
ક્રયાદ્યર્થમુત્થાપિતા ભાન્તિ નિત્યમ્ ॥

તથા સૃષ્ટિકાણ્ડમનન્તં વિલોક્ય
હ્યનીશં સ્વતન્ત્રં વદન્તીહ મૂઢાઃ ।
સુધીઃ સૂક્ષ્મદર્શી તુ જાનાતિ નિત્યં
વિધાતાસ્ય નેતા પ્રભુર્વિશ્વકર્તા ॥ ૮॥

ઇતિ ।

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. Shri Ramakrishnopadeshavalih 2 ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on August 22, 2017

Please send corrections to *sanskrit@cheerful.com*